International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(3): 225-229
© 2024 IJSR
www.anantaajournal.com
Received: 01-02-2024
Accepted: 05-03-2024

**डॉ. शुभमयपाहाडी**
अध्यापकः, स्नातक-स्नातकोत्तरसंस्कृतविभागः, प्रभातकुमारमहाविद्यालयः, काँथि: पूर्वमेदिनीपुरम् ; पश्चिमवङ्गः, भारत

Corresponding Author:
**डॉ. शुभमयपाहाडी**
अध्यापकः, स्नातक-स्नातकोत्तरसंस्कृतविभागः, प्रभातकुमारमहाविद्यालयः, काँथि: पूर्वमेदिनीपुरम् ; पश्चिमवङ्गः, भारत

# वैदिकवाङ्मये शून्यतत्त्वस्यावधारणा

## डॉ. शुभमयपाहाडी

### सारांश
वेदस्य मूलसंहिताषु असीममनन्तं ज्ञानं परिपूर्णरूपेण विद्यते। न केवलमाध्यात्मिकमपि तु सर्वाणि आधिभौतिकानि आधिदैविकानि च ज्ञानानि वेदेषु अन्तर्भूक्तानि सन्ति। सर्वाणि भौतिक विज्ञानानि यस्याधारेण प्रभवन्ति स भवति वेदः। वैज्ञानिकाः आमनन्ति यत् भारतवर्षं न केवलं धर्म-दर्शनक्षेत्रे अपि तु विज्ञान-कारिगरिक्षेत्रेऽपि विशेषतया चिन्तनमकरोत्। एवञ्च भारतीयाः पुर्वजाः ऋषयः चिन्तकाः विज्ञान-अध्यात्मयोः समन्वयं कृतवान्। वैदिकवाङ्मये ब्रह्मविद्यया सह द्रव्यज्ञान-सृष्टिविद्या-भौतिकी विद्या-आकर्षणानुकर्षणविद्या-प्रकाश्य-प्रकाशकविद्या-गणितविद्या-तारविद्या-वैमानिकविद्या-चिकित्साविज्ञान-वास्तुविज्ञानानि वर्णितानि। वस्तुत: एतेषामाधारेणैव आधुनिकविज्ञानं प्रभवति। अत्र विशेषतः गणितशास्त्रस्य चिन्तनं येन विना वयं कर्त्तुं न शक्नुमः तस्यैव शून्यतत्त्वस्य विश्लेषणं विधीयते। प्राचीनभारतवर्षे शून्यशब्दस्य उपयोगः व्यापकः महत्त्वपूर्णश्च।

**कुटशब्द:** वेदः, वैदिकवाङ्मयः, शून्यतत्त्वम्,आधुनिकविज्ञानम्, गणितशास्त्रम्।

### प्रस्तावना
वेदानां महत्त्वमङ्गीकृत्यैव भारतीयैः पाश्चात्यैश्च विपश्चिद्भिः वेदाध्ययने स्वजीवनं यापितम्। न केवलं सांस्कृतिक-अर्थनैतिक-सामाजिक-नैतिक-राजनैतिक-दार्शनिक-धर्मीयक्षेत्रेषु अपि तु आधुनिक-वैज्ञानिकक्षेत्रे वेदस्य समधिकं महत्त्वमनुभूयते। सोऽयं भगवान् ज्ञानेन-विद्यया सामर्थ्येन च कारणरूपायाः जडप्रकृत्याः इमम् संसारमसृजत्। वेदस्य मूलसंहिताषु असीममनन्तं ज्ञानं परिपूर्णरूपेण विद्यते। न केवलमाध्यात्मिकमपि तु सर्वाणि आधिभौतिकानि आधिदैविकानि च ज्ञानानि वेदेषु अन्तर्भूक्तानि सन्ति। सर्वाणि भौतिक विज्ञानानि यस्याधारेण प्रभवन्ति स भवति वेदः। वैज्ञानिकाः आमनन्ति यत् भारतवर्षं न केवलं धर्म-दर्शनक्षेत्रे अपि तु विज्ञान-कारिगरिक्षेत्रेऽपि विशेषतया चिन्तनमकरोत्। एवञ्च भारतीयाः पुर्वजाः ऋषयः चिन्तकाः विज्ञान-अध्यात्मयोः समन्वयं कृतवान्। वैदिकवाङ्मये ब्रह्मविद्यया सह द्रव्यज्ञान-सृष्टिविद्या-भौतिकी विद्या-आकर्षणानुकर्षणविद्या-प्रकाश्य-प्रकाशकविद्या-गणितविद्या-तारविद्या-वैमानिकविद्या-चिकित्साविज्ञान-वास्तुविज्ञानानि वर्णितानि। वस्तुत: एतेषामाधारेणैव आधुनिकविज्ञानं प्रभवति। न्युटन-आर्कमिडिज-गैलीलियोप्रभृतयः पाश्चात्यवैज्ञानिका द्विसहस्रवर्षेभ्योः गवेषणाकर्म कृतवन्तः किन्तु तस्मात् सहस्रेभ्यः वर्षेभ्यः प्राक् भारतवर्षे वैज्ञानिका वैज्ञानिकमनुसन्धानं कृतवन्तः। विषयेऽस्मिन् ऋषिः अरविन्दः कथयति- “Power of the ancient Indian spirit was a strong intellectuality, at once austere and rich, robust and minute, powerful and delicate, massive in principle and curious in details”.

**अनुसृता पद्धतिः**
अस्मिन् प्रबन्धे वेदानां सम्यक् विश्लेषणपूर्वकं प्राचीनभारतीयगणितशास्त्रे शून्यतत्त्वस्य विचारः कथं जातः तस्य समीक्षणं जातम्। अतः मूलतः समीक्षणात्मकमध्ययमत्र विहीतम्। स्थाने स्थाने प्रयोजनवशात् तुलनात्मकमध्ययनमपि कृअतम्।

**विश्लेषणम्**
वेदाङ्गज्योतिषशास्त्रेषु गणितस्य सर्वोच्चं महत्वं प्रतिपादितम्। उक्तञ्च तत्र –

"यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद्वेदाङ्गशास्त्राणां गणितं मूर्धनि स्थितम्" ॥

अत्र विशेषतः गणितशास्त्रस्य चिन्तनं येन विना वयं कर्त्तुं न शक्नुमः तस्यैव शून्यतत्त्वस्य विश्लेषणं विधीयते। प्राचीनभारतवर्षे शून्यशब्दस्य उपयोगः व्यापकः महत्त्वपूर्णश्च। कठोपनिषदनुसारं तत्तु " अणोरणीयान महतो महीयान" [1]इति। शूना+यत् प्रत्ययेण शून्यशब्दस्य निष्पत्तिः। यत्तु श्वि' धातोः रूपमिति। यस्यार्थो भवति प्रसन्नता वर्धनं वा। ऋग्वेदे शब्दोऽयं अपर्याप्ततां ( the sense of lack or deficiency) सूचयति।
यद्यपि प्राचीनव्याविलणीयानां शून्यविषये स्वकीया धारणाऽऽसीत्, तथापि भारतीया एव शून्यं क्षुद्रवृत्तरूपेण कल्पितम्। शून्यस्योत्पत्तिविषये एका श्रुतिर्वर्त्तते। यदा आलेक्जन्डर भारतं प्रति समागतः तदा ध्यानमग्नमेकं साधुं दृष्ट्वा अपृच्छत् यत् भवान् किं करोति ? साधु अकथयत् अहं शून्यमनुभवामि। पुनः साधोः जिज्ञासा आसीत् भवान् किं करोति ? आलेक्जन्डर उत्तरमयच्छत् अहं विश्वजयं करोमि। वस्तुतः द्वाभ्यां विश्वजयमभवत्। शून्यस्य अनुभवोऽपि उत्कृष्टं चिन्तनम्। वैदिककालादेव प्राचीनऋषिणां सुगभीरज्ञानसञ्जातदार्शनिकवक्तव्येषु शून्यस्य कथा दृश्यते। यद्यपि तच्छून्यं न गाणितिकम्। प्राचीनसभ्यतासु खीष्टपूर्वतृतीयशतकात् नवमशतकं यावत् केवलं माया सभ्यता एव लिखितां लिपिसमृद्धां शून्यसंख्यां स्वीकृतवान्। बौद्धकालात् जैनकालाद् पूर्वमेव शून्यस्यावधारणासीदिति निर्विवादम्।
भारतीयज्योतिर्विदेन आर्यभट्टेन तथा गणिताचार्येण ब्रह्मगुप्तेन सर्वादौ शून्यतत्त्वस्य प्रयोगः विहितः। ऋग्वेदस्य नासदीयसूक्ते बौद्धदर्शनस्य माध्यमिकसिद्धान्ते अथवा तन्त्रस्य निष्कलशिवचिन्तने नैयायिकस्याभावचिन्तने वा शून्यस्य जयध्वनिः तथा दार्शनिकं विश्लेषणं श्रूयते। पाणिनीयव्याकरणेऽपि लोपपदेन शून्यस्य धारणाऽनुभूयते। उच्यते तत्र "अदर्शनं लोपः" इति। सुतरां लोप नाम एका विद्यमाना अदृश्या सत्ता। छान्दोग्योपनिषदि श्वेतकेतुः वटवीजस्याभ्यन्तरे किमपि न दृष्टवान् अर्थात् शून्यं दृष्टवान्। तच्छून्यमेव सर्वेषामुत्सभूतम्। अस्मात् शून्यादेव विशालस्य वट्वृक्षस्योत्पत्तिरिति। परमशून्यादेव जगत उत्पत्तिः। सुतरां शून्यमेव अव्यक्तं ब्रह्म। स्वतन्त्रशून्यस्य मानमव्यक्तम्। यदा तदन्यैः सह एकत्रितं भवति तदैव प्रकाशते। एवं केवलं ब्रह्म एव अव्यक्तम्। वस्तुना सह एकात्मतामात्रेण तस्य परिप्रकाशः। शून्यं न केवलं नास्तित्वभावनां द्योतयति अपि च पूर्णतां प्रतिपादयति। शून्यमिदमेकं दैवमनन्तत्वं प्रकटयति। शून्यं वस्तुतः विनाश-सर्जनयोः अनन्तलये स्पन्दितं भवति। तदैव निर्गुणमव्यक्तम् सगुणं प्रकाशात्मकं भवति। शून्यं निरपेक्षम्। शून्येन सह ब्रह्मणः स्वभावः सादृश्यपूर्णः।
यजुर्वेदे गणितविषयकं नैके मन्त्राः प्राप्यन्ते यैः वेदस्य गणितमूलत्वं प्रमीयते। तस्यैव मूलं भवति शून्यतत्त्वम्। शून्यं भवति विश्वस्यैकमुत्कृष्टं तत्त्वमिति। अस्य तात्त्विकं पर्यालोचनमद्यापि प्रचलति। तस्मादेव जगतः सृष्टिः तत्रैव लय इति। तत्त्वस्यास्य अवधारणा बैज्ञानिकैः दार्शनिकैश्च भिन्नदिशा विहिता। सर्वादौ वेदे "ख" इति पदेन शून्यस्य उल्लेखो दृश्यते – " खे रथस्य"[2] । यस्यार्थस्तु आकाशम्[3], इन्द्रियम्[4], रिक्तस्थानम्[5], छिद्रं, द्वारम्, अन्तरिक्षम्, स्वर्गलोकश्चेति। "ॐ खं ब्रह्म" इति यजुर्वेदस्य मन्त्राधारेण वक्तुं शक्यते यत् शून्यं भवति ब्रह्मस्वरूपम्। गणितशास्त्रे इदं शून्यं भवति अनन्तापरिमितापरिमेयासंख्येयस्याः शक्त्याः ऊर्जायाश्च वाचकः। एतस्मादेव समेषामङ्कानां संख्यानां वोत्पत्तिरिति। इदं धनात्मक (Positive)-ऋणात्मक (Negative) शक्तिभेदेन द्विविधम्। तत्र धनात्मिका शक्तिः परार्धं ऋणात्मिका शक्तिश्चावरार्धं सूचयति। तदर्थं +(Plus) – (Minus)इति सङ्केतेन सर्वेषां संख्यानां योगं वियोगं वा कर्तुं शक्यते। वराहमिहिरस्य सूर्यसिद्धान्ते सुबन्धोः वासवदत्तायाञ्च शून्य विन्दवः इत्यनेन विन्दुना सह शून्यस्य तुलणा विद्यते। अमरकोशे शून्यं नाम रिक्तम्।
यजुर्वेदे एकतः प्रारभ्य पराधं यावत् संख्यानामुल्लेखोऽस्ति। उच्यते च " एका च .... अनन्तश्च परार्धश्च।[6] संख्यायाः अष्टादशतमं स्थानं भवति परार्धः। मन्त्रेष्वपि परार्धशब्दोऽतीव महत्वपूर्णः। परार्धस्यार्थो भवति परं नाम उत्कर्षं प्रति, अर्धभागः। सुतरां धनात्मिकासंख्याया एकतः

[1] कठोपनिषद्, १.२.२० ।

[2] ऋद्वेदः, ८.९१.७ ।

[3] तत्र, १०. १५६. ३. ।

[4] "कः सप्त खानि वितततर्द शीर्षाणि"। अथर्ववेदः, १०.०२.०६ ।

[5] ॐ खं ब्रह्म । यजुर्वेदः, ४०.१७

[6] यजुर्वेदः, १७.२.।

(+१) आरभ्य १८ तमं स्थानं यावत् वर्धते चेत् प्रत्येकसंख्या १०गुणं भविष्यति। इयं दशगुणोत्तरसंज्ञा इत्युच्यते [7]। सुतरां परार्धस्याभिप्रायः भवति अष्टादशस्थानं यावत् धनात्मिकासंख्यानां यत् नामकरणं तत्तु सम्पूर्णसंख्याया अर्धभागः। अपरार्धभागस्तु ऋणात्मिका संख्या या वेदे अवरार्धनाम्नाऽभिहिता। अपि च शतपथब्राह्मणे [8] काण्वसंहितायां [9] च अपरार्धस्य अवरार्धस्य वा प्रसङ्ग उल्लिखितः। अस्यार्थो भवति अष्टादशस्थानं स्थानं यावत् ऋणात्मिका संख्या। एतां शत-सहस्राद्याधारेण शतांश-सहस्रांश-लक्षांशादयः उच्यन्ते। गुणस्य विरूद्धावस्थेषा। सुतरां शून्यात् प्राक् संख्या परार्धं तथा शून्यात् परं च अपरार्धं द्योतयति। यजुर्वेदे अतिदीर्घपदेन धनात्मिकासंख्यां तथा अतिह्रस्वपदेन ऋणात्मकसंख्या वोध्यते [10]। सुतरां धनात्मिका-ऋणात्मिकाशक्त्योर्मध्ये विद्यमाना एका अदृश्या शक्तिर्भवति शून्यमिति।

संख्यायाः परं शून्ययोगेन तस्य दशगूणमानं वृद्धिर्भवति। तत्र अङ्कानां वामतो गतिः। उच्यते च –

"अङ्केषु शून्य विन्यासाद्, वृद्धिः स्यात् तु दशाधिका।
तस्माद् ज्ञेया विशेषेण, अंकानो वामतो गतिः ॥
समयोचित-पद्यरत्नमालिका" ॥

वस्तुतः दशमलवस्थानमानपद्धतिर्भवति भारतवर्षस्य सर्वोत्कृष्टमाविष्कृतं तत्त्वम्। अस्यां पद्धत्यां एकतः (१) आरभ्य नवमं(९) यावत् नवाङ्काः विद्यन्ते। तत्र दशमं भवति शून्यमिति। एतेन दशचिह्नमाध्यमेन सर्वं खलु गणितविज्ञानं प्रचलति। शून्यस्यापरिहार्यताप्रसङ्गे प्रसिद्धगणितविद् G.D.Halsted महोदयः कथयति यत् – " The importance of the creation of Zero mark can never be exaggerated. this giving to airy nothing, not merely a local habitation and a name, a picture, a symbol, but helpful power, is the characteristic of the Hindurace whence it sprang. it is like coining the Nirvana into the general on-go of intelligence nad power." [11] सुतरां निरथकं शून्यं न केवलं स्थान-काल-संज्ञा-आकृति-सङ्केतैः ग्रहणमपि तु यथार्थोपयोगीशक्तिप्रदानमपि हिन्दुजातेः वैशिष्ट्यमिति। वेदे अनन्त [12] -अपरिमित [13] -असंख्यात [14] -असंख्येयादयः [15] शब्दाः शून्यस्य महत्त्वं द्योतयन्ति। कुत्रापि शून्यशब्दः ब्रह्म-शिवादिवोधकः कुत्रापि च विविधासु शक्तिषु अस्य प्रयोगः। ऋग्वेदस्य "दशान्तरुष्याद् तिरोचमानम्" इति मन्त्रे दशसंख्यायाः महत्त्वं सम्यक् प्रतिपादितमस्ति [16]। अत्र दशान्तरुष्य नाम दशसंख्यत्वात् गुप्तरूपेण शक्तिवर्द्धनमिति। प्रसङ्गेऽस्मिन् सायणाचार्येणोक्तं यत् –

"अन्तरुष्यं गूढम् आवास स्थानम्।
तच्च स्थानम् दशसंख्योपेतम्" [17] ॥

यजुर्वेदे अनन्तापरिमेयत्वेन शून्यस्य ग्रहणं जातम्। कयापि संख्यया शून्यं योजयते गुणमानं क्रियते, विभाजनं वा क्रियते चेत् तस्य मानं समानमेव वर्त्तते। न जायते किमपि परिवर्तनं तत्र। द्वितीयभास्कराचार्येण सर्वादौ प्रतिपादितं यत् का संख्या शून्येन विभाजिता भवति चेत् तत्र अनन्ता संख्या आगच्छति। इयमनन्तराशिर्भवति खहारः इति। उच्यते च –

"वधादौ वियत् खस्य खं खेनघाते।
खहारो भवेत् खेन भक्तश्च राशिः ॥
अयमनन्तो राशिः खहर इत्युच्यतेव्।[18]॥

यथा प्रलयकाले सृष्टौ वा अनन्तेऽच्युते विष्णौ सर्वेषां प्राणीनां लीनत्वे निर्गते वा न भवति कोऽपि विकारः तथैव कहरराश्यां योगेन, वियोगेन, भागेन, गुणभूतेन वा किमपि परिवर्त्तनं न जायते –

" अस्मिन् विकारः खहरे न राशौ अपि प्रविष्टेष्वपि निःसृतेषु।
बहुष्वपि स्याद् लय-सृष्टि-कालेऽनन्तेऽच्युते भूतगणेषु यद्वत् [19]॥

उपनिषत्स्वपि भावनेयं दृश्यते – यथा पूर्णात् पूर्णस्य ग्रहणेन पूर्णमेव तिष्ठति तथैव शून्यात् शून्यस्य ग्रहणेन

---

7 अवरार्धतः दश गुणोत्तरं संज्ञाः । लीलावती, ३।

8 शतपथब्राह्मणम्, ९.१.२.१६.१.

9 काण्व. ४.१.३.१.

10 अतिदीर्घं चातिह्रस्वम् । यजुर्वेदः, ३०.२२ ।

11 Foundation and technique of Arithmetic, p.20.

12 ऋग्वेदः, ११३.३ ।

13 अपरिमितो यज्ञः । अथर्ववेदः, ९.५.२१ ।

14 असंख्याता सहस्राणि ये रुद्राः । यजुर्वेदः, १६.५४।

15 शतं सहस्रं अयुतं न्यर्बुदम् असंख्येयम् । अथर्ववेदः, १०.८.२८ ।

16 ऋग्वेदः, १०.५१.३।

17 ऋग्भाष्यम्, १०.५१.४ ।

18 बीजगणितम्, ३ ।

19 तत्र, ४ ।

शून्यमेवावशिष्यते।

"पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते"[20] ॥

ऋग्वेदे एकाधिकमन्त्रेषु शून्यस्य तथा दशमलवपद्धतेः उल्लेखो दृश्यते। दशमलवपद्धतिविषये तत्र उच्यते यत्-

"दशवनिभ्यो दशकक्ष्येभ्यो दशयोक्त्रेभ्यो दश योजनेभ्यः।
दशाभीशुभ्यो अर्चताजरेभ्योदश धुरो दश युक्ता वहद्भ्यः॥
ते अद्रयो दशयन्त्रास आशवस्तेषामाधानं पर्येति हर्यतम्"[21]॥

मन्त्रप्रयुक्तानां गूढशब्दानां भावोऽधस्तात् प्रदीयते। दशमलवपद्धतिप्रयोगस्य दशक्षेत्राणि दश अवनि इत्युच्यन्ते। एकतः(१) दशं(१०) यावत् अङ्काः दशक्षेत्रेण प्रयुज्य शतं क्षेत्राणि भवन्ति। योग-वियोग-गुण-भाग-वर्ग-बर्गमूल-घन-घनमूलादिभेदेन संख्यानां दश कक्ष्याः भवन्ति। पुनः रेखा-गणितादिषु दशविधकोणादयः भवन्ति दश योक्त्राणि। तञ्च दशविधेषु योजनेषु प्रयोक्तुं शक्यते। दशविधाभिशु शङ्कुः भवति Rein, Ray, Peg भेदेन । तत्तु दशधुरा(yokes)युक्तम्। तत् दशविधेन प्रयोगेषु नेतुं शक्यते। एते दश अङ्काः दशयन्त्राणां कार्यं कुर्वन्ति। एतैः अङ्कैः वृहतातिवृहत्संख्यां विभाजनं कर्तुं शक्यते। आशव नाम संख्यापद्धतिः अतीव सरला शीघ्रप्रभावकारिणी च। एवञ्च पद्धतीयं रमणीयं सुन्दरञ्चेति। सुतरां पद्धतिरेषा उत्कृष्टा। समेषां गाणितिकप्रश्नानां समाधानं सरलतया शीघ्रतया च अत्र भवितुमर्हति। सप्तमशताब्दौ आचार्यब्रह्मगुप्तेन शून्य-ऋणात्मकसंख्यायुक्त अङ्कगणितयोः नियमं प्रदातुं प्रयासो विहितः। शून्यम्(०)+ ऋणात्मकसंख्या = शून्यम्। ०+ धनात्मकसंख्या= धनात्मकसंख्या, ०+०= ०, ऋणात्मिकासंख्या – ० =धनात्मिका, धनात्मिका – ० = ऋणात्मिका भवति। ०-०=०। पुनश्च स प्रतिपादयति यत् ० x ०= ० भवति।

पदार्थविद्यावाङ्मये परमं शून्यं भवति तात्त्विकं परिमापनम् यत्र कणायाः अत्यल्पः तापप्रवाहो वर्त्तते। प्रवाहोऽयं भवति -२७३.१५डिग्रि सेल्सियस्। स्थानमूल्यपद्धतिं विना मौलिकपाटिगणितस्य चिन्तनमपि वयं कर्त्तुं न शक्नुमः। अत्र शून्यस्य महत् स्थानं विद्यते। वीजगणितस्य भित्तिस्तम्भस्वरूपं भवति शून्यम्। प्राचीनकाले ज्योतिषचर्चायां शून्यस्य महती आवश्यकता दरीदृश्यते। सुतरां प्राचीनसंस्कृतौ, ज्योतिर्विद्यायां, गाणितिकक्षेत्रे, पदार्थविज्ञाने दार्शनिकक्षेत्रे च शून्यस्य समधिकंविश्लेषणं सम्भवति।

## उपसंहारः

एवञ्च गणितशास्त्रे संख्याविधानम्, गणितानां भेदोपभेदाः, इत्यादि वहवः विषयाः चर्चिताः। तेषामत्र स्थालीपुलाकन्यायेनोपस्थापनं जातम्। लक्ष्यन्त्वत्र केवलम् एतदेव प्रतिपादनं यत् गणितविद्यायां सम्प्रति ये ये मार्गाः गृहीताः याः याः पद्धतयः अवलम्विताः समेषामेव चिन्तनं अस्माकं वैदिके तथा संस्कृतवाङ्मये जातम्। अपि च आधुनिककाले गणितशास्त्रस्य यादृशं वैज्ञानिकमुत्कर्षं परिलक्ष्यते तस्य वीजं तु अस्माकं वैदिकऋषयः मुनयः सहस्रेभ्यः वर्षेभ्यः प्राक् प्रतिपादितवन्तः। महर्षि दयान्दस्य मतेन वेदस्य अधिकांशभाष्यकाराः वेदस्य आध्यात्मिकं भाष्यं कृतवन्तः अतः तत्र यदि आधिभौतिकं भाष्यं भवेत् तर्हि वेदस्य आधुनिकविज्ञानस्य वीजं कथं निहीतमस्ति तत् सम्यक् ज्ञातुं शक्यते। वेदे तु आध्यात्मिक-आधिभौतिक-आधिदैविकानि सर्वाणि तत्त्वाणि अन्तर्भूक्ताणि। विषयेऽस्मिन् वेदभाष्यकृता सत्यव्रतसाश्रमीमहोदयेन उक्तं – " Our opinion is that in Vedic times our country had made extraordinary progress". तर्हि वेदस्य तथा परवर्त्तीशास्त्राणां सम्यक् अध्ययणेन प्रयोगेन च आधुनिकविज्ञानस्य इतोऽपि वर्द्धनं भविष्यतीति नास्ति सन्देहः। केवलं च तत्र समन्वयः आवश्यक इति शम्।

## ग्रन्थसूची


1. तिवारी, डः. दयाशङ्कर, संस्कृत वाङ्मय में गणितीय परम्परा, चौखम्बा ओरियन्टालिया, दिल्ली२०१८।
2. शर्मा,श्रीराम(सम्पा०),१०८ उपनिषद् (ब्रह्मविद्याखण्ड) युग निर्माण योजना विस्तार ट्रस्ट, मथुरा, उत्तरप्रदेश।
3. शर्मा, श्रीराम (सम्पा० ), २०१५, १०८ उपनिषद् (ज्ञानखण्ड), युग निर्माण योजना विस्तार ट्रस्ट, मथुरा, उत्तरप्रदेश |
4. झा, सुरकान्त (सम्पा० ), २०११, अग्निमहापुराणम्, चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी।
5. गौड़, रामस्वरूप शर्मा (सम्पा०) २०१५, सामवेद (सायणभाष्यसहित), चौखम्बा पब्लिशिंग हाउस, नई दिल्ली।
6. झा, लषणलाल (व्याख्या.) २०१३, लीलावती, चौखम्बा विद्याभवन, वाराणसी।
7. मुळे, गुणाकर, २०११, भास्काराचार्य, राजकमल प्रकाशन, दिल्ली।
8. कुलकर्णी, रघुनाथ, पुरुषोत्तम, २००३, चार शुल्बसूत्र, महर्षि सान्दीपनि राष्ट्रीय वेद विद्या प्रतिष्ठान, उज्जैन।


[20] उपनिषद् शान्तिपाठः ।

[21] ऋग्वेदः, १०.९४.७-८ ।

9. उपाध्याय, बलदेव, २०१०, संस्कृत शास्त्रों का इतिहास, चौखम्बा विद्याभवन, वाराणसी।
10. सोनी, सुरेश, २०११, भारत में विज्ञान की उज्ज्वल परम्परा, प्रकाशन, भोपाल।
11. अर्चना तोमर, लज्जा राम, २०१५, प्राचीन भारतीय शिक्षा पद्धति, सुरुचि प्रकाशन, नई दिल्ली।
12. मुसलगाँवकर, गजाननशास्त्री, २०१५, वैदिक साहित्य का इतिहास, चौखम्बा संस्कृत संस्थान, वाराणसी।
13. Agarwal Om Prabhat, 2015, Ancient India Spiritualism andScience, Suruchi Prakashan, New Delhi.
14. Archak, K.B. (Edited) 2007, Science, History, Philosophy and literature in sanskrit classics. Sandeep Prakashan, Delhi.
15. Arya, Ravi Prakash (Edit.), 2013, Yajurveda Samhita, Parimal Publications, Delhi.
16. Arya, Ravi Prakash and Joshi, K.L. (Edit), 2016, Rigveda Samhita (Vol. I-II), Parimal Publications, Hyderabad.
17. Bag, A.K., 1979, Mathematics in Ancient and Medieval India, Chaukhamba orientaliya, Varanasi.
18. Bhaskar-I and someswara (Commentary), Shukla K.S. and sharma K.V. (Edited), 1976, Aryabhatiya of Aryabhatt, Indian National Science Academy, New Delhi.
19. Burgees, E. (Thans of edit.) 1989, Gangooli Phanindralal (Reprinted) Suryasiddhanta, Motilal Banarasidass, Delhi.
20. Datt, Bibhutibhushana & Singh Avadesh Narayan, 2004, History of Hindu Mathematics (Vol. 1 & 2) Bharatiya Kala Prakashan, Delhi.
21. Joshi, K.L. (Edit.), 2015, Atharvaveda Samhita (vol. 1 to 3), Parimal Publications, Delhi
22. Science in Sanskrit, Sanskrita Bharati, New Delhi, 2007.